"कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तम्" सा०द०। "दीक्षितेष्वभिषिक्तेषु व्रततीर्थपरेषु च" परा०। "सैनापत्येन देवानामभिषिक्तो गुहस्तदा" भा०व०प०। २ स्नाते च। अभिषिक्तेन निर्वृत्तम् सङ्कला० अण्। आभिषिक्तः अभिषिक्तनिर्वृत्ते कूपे पुं०। [सोमादौ च ३काञ्जिके न०।

**अभिषुत** त्रि० अभि+सु—क्त। १ निष्पीड़िते २ कृताभिषवे

**अभिषेक** पु० अभि+सिच—घञ्। १ विधिना शान्त्यर्थं सेचने, २अधिकारप्राप्त्यर्थं स्नाने, यथा "अथाभिषेकं रघुवंशकेतोः" रघुः। मन्त्रादिना शिरसि जलप्रक्षेपमात्रेण ३ मार्जने। ४स्नानमात्रे च। "कृताभिषेकां हुतजातवेदसम्" कुमा०। "निष्यन्दिनीरनिकरेण कृताभिषेकाः" माघः "तत्राभिषेकं कुर्वाणो गोसहस्रफलं लभेत्"। "तत्राभिषेकं कुर्व्वीत पितृदेवार्चने" रतः "तत्राभिषेकं कुर्व्वीत नागतीर्थे नराधिप। भा०व०प०। ५ कर्म्मान्ते शान्त्यर्थं स्नाने च। 'सुरास्त्वामभिषिञ्चन्तु इत्यादिमन्त्रैः स्नाने तच्च मत्कृततुलादानादिपद्धतौ २०६पृष्ठे दृश्यम्। ६प्रतिष्ठादौ देवादेः स्नपने च। करणे घञ्। ७ जले।

**अभिषेक्तृ** त्रि० अभि+सिच—तृच्। अभिषेक्तरि स्त्रियां ङीप्।

**अभिषेक्य** त्रि० अभिषेक्तुमर्हति अभि+सिच—ण्यत् कुत्वम्। अभिषेकयोग्ये "अभिषेक्याभविष्यत समाप्लुवन्त इत्याह राजपुत्रान्" कात्या० २०,२,१७ "यूयमश्वरत्नां समाप्लुवन्तः पट्टाभिषेकयोग्या भविष्यथ" कर्क०।

**अभिषेचन** न० अभि+सिच—भावे ल्युट्। अभिषेकशब्दार्थे अभिषेचने हितम् ठञ्। आभिषेचनिकम्। अभिषेक द्रव्यमन्त्रादौ त्रि०। करणे ल्युट्। अभिषेकद्रव्ये न०।

**अभिषेचनीय** त्रि० अभि+सिच—कर्म्मणि अनीयर्। अभिअभिषेकार्हे "ये वा एतस्योद्दचं गमिष्यन्ति राष्ट्रं ते भविष्यति राजानो अभिषेचनीयाः" शत०ब्रा०। साध्वर्थे छ। २ अभिषेकद्रव्ये त्रि० "पुरोडाशस्विष्टिकृतोऽभिषेचनीयवत्" कात्या० १८,६,१५, "राजसूयस्यान्तर्गताभिषेचनीय सोमस्येव" कर्क० "अभिषेचनीयेच्छा" शत०ब्रा०।

**अभिषेणन** न० सह इनेन सेना तयाभिमुखं याति शत्रोः अभि+सेना+णिच्—ल्युट् षत्वम्। युद्धार्थं शत्रोरभिमुखं सेनया सह जिगीषोर्गमने।

**अभिष्टन** पु० अभि+स्तन—अप् षत्वम्। सिंहनादे "अभिष्टने ते अद्रिवो यत् स्था" ऋ० १,८०१४, "अभिष्टने सिंहनादे" भा०।

**अभि(भी)ष्टि** त्रि० अभि+यज—इष वा क्तिन् वेदे पृ०एका०। १"अभियष्टव्ये 'महाँ अभिष्टिरोजसा य०३३,२५, अभीज्यते इत्यभियष्टव्यः वे०दी०। २ अभिलाषे,। आसादभिष्टिकृदवसे यासदुग्रः" य० २०,४८ अभिष्टिमभिलाषं करोतीत्यभिष्टिकृत् मनोरथप्रदः" इति वेददी०।

**अभिष्टुत** त्रि० अभि+स्तु—क्त। १वर्णिते, २स्तुते, च।

**अभि(स्य)ष्यन्द** पु० अभि+स्यन्द—भावे घञ् अप्राणि कर्त्तरि वा षत्वम्। १ अतिवृत्तौ २ स्रवणे ३ जलादिक्षरणे च। कर्त्तरि घञ्। ४ अधिके। 'स्वर्गाभिष्यन्दवमनमिति" कुमा०। "भूतपूर्व्वमभूतपूर्व्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेदिति"कौटि०। आधारे घञ्। ५नेत्ररोगहेतौ। "प्रायेण सर्व्वे नयनामयास्ते भवन्त्यभिष्यन्दनिमित्तमूलाः"। तस्मादभिष्यन्दमुदीर्यमाणमुपाचरेदाशु हिताय धीमान्' सुश्रु०। उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात् स्वप्नविपर्य्ययाच्च। स्वेदाद्रजोधूमनिषेवणाच्च छर्द्देर्विघाताद्वमनातियोगात् द्रवात्तथान्नान्निशि सेविताच्च विण्मूत्रवातक्रमनिग्रहाच्च प्रसक्तसंरोदनशोककोपाच्छिरोभिघातादतिमद्यपानात्। तथा ऋतूनाञ्च विपर्य्ययेण क्लेशाभिघातादतिमैथुनाच्च। वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च नेत्रे विकारान् जनयन्ति दोषाः। स च चतुर्विधः यथा। वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः। प्रायेण जायते घोरः सर्व्व नेत्रामयाकरः। सुश्रु०।

**अभिष्यन्दनगर** न० अभिष्यन्देन प्रधाननगरातिवृद्ध्या तदतिवाहेन कृतं नगरम्। शाखानगरे अभिष्यन्दरमणमित्यपि पाठः। रलयं रतिस्नानं हेत०। तत्रार्थे।

**अभिष्य(स्य)न्दिन्** त्रि० अभिष्यन्दते अभि+स्यन्द—णिनि अप्राणिकर्त्तरि वा सत्वम् १ सर्व्वतः स्रुते। 'पयोऽभिष्यन्दि गुर्व्वामं प्रायशः परिकीर्त्तितम्" सुश्रु०।

**अभिष्वङ्ग** पु० अभि+स्वन्ज—घञ्। १ उत्कटरागे २अनात्मन्यहंबुद्धौ च "असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु" गीता

**अभिसंरब्ध** त्रि० अभि+सम्+रभ—क्त। १ क्रुद्धे। [निष्पन्ने च

**अभिसंवृत्ति** स्त्री अभि+सम्+वृत—क्तिन्। १ व्यवहारे२अभि-

**अभिसंश्रय** च० अभितः संश्रयः। १ सर्वत आश्रये "यदि कुर्य्यात् भवानेवं विलेऽस्मिन्नभिसंश्रयम्" रामा०।

**अभिसंसार** अव्य० संसारस्याभिमुख्यम् अव्ययी०। संसाराभिमुख्ये। अभि+सम्+सृ—वीप्सायां णमुल्। अभिनावीप्साद्योतनात् न द्वित्वम्। अभिसंसारम् अभिगम्याभिगम्येत्यर्थे। "महानागमिवाभिसंसारं दिदृक्षितारः" श०ब्रा०